# 7

# उपनिषत्सु 'आत्मतत्त्वम्'

पिङ्कु कलिता
शोधछात्रः, संस्कृत वेदाध्ययन विभागः
कुमार भास्करवर्म संस्कृत-पुरातनाध्ययन विश्वविद्यालयः, नमाटिः, नलबारी, असम प्रदेशः

डॉ. बर्णाली बरठाकुर
विभागाध्यक्षा, सहायकाचार्या, संस्कृत वेदाध्ययन विभागः
कुमार भास्करवर्म संस्कृत-पुरातनाध्ययन विश्वविद्यालयः, नमाटिः, नलबारी, असम प्रदेशः

सारांशः

वेदस्यान्तिमभागोऽस्ति 'उपनिषदि'ति । वेदेषु वर्णितेषु विषयेषु कर्म-ज्ञानकाण्डयोः प्रमुखरूपेणात्र ज्ञानकाण्डस्य वर्णनं प्राप्यते । एवम् उपनिषदः प्रमुखं ज्ञानं तु जीवनरहस्यस्य प्रकृतं ज्ञानमुपस्थापनमिति । जीवनरहस्यविज्ञाने किं नाम 'आत्मतत्त्वम्' ? इति ज्ञानमपरिहार्यं भवति । यतोहि आत्मतत्त्वस्य विज्ञानं विना मनुष्यजीवनस्य प्रमुखं प्रयोजनं 'मोक्ष'प्राप्तिरपि वृथा जायते । तस्मात् जीवनस्य प्रमुखप्रयोजनप्राप्तये 'आत्मतत्त्वम्'अवश्यमेव ज्ञातव्यमिति । किं नाम 'आत्मतत्त्वम्' ? तस्यैव वर्णनं प्राप्यते शोधपत्रेऽस्मिन् । आत्मनः स्वरूपस्य सुष्ठुज्ञानं प्राप्स्यति अस्य शोधलेखस्य अध्ययनात्परम् ।

कूटशब्दाः

आत्मतत्त्वम्, जीवात्मा, परमात्मा, अमरत्त्वम्, जाग्रतः, स्वप्नः, सुषुप्तिः, तुरीयम् ।

## प्रस्तावना

'विद्'धातुना सह 'अच्'अथवा 'घञ्' प्रत्यययोगेन 'वेद'रिति शब्दो निष्पद्यते । तत्र 'विद्'धातो अर्थस्तावत् 'ज्ञान'मिति । वेदो हि सर्वा विद्यारम्भा सर्वा कर्मारम्भा च । सर्वेषां तत्त्वानां मूलरूपं बीजं तु वेदेष्वेव प्राप्यते । तस्मात् प्रोक्तं मनुना –**'वेदोऽखिलो धर्ममूलम्'**[१]इति । किं नाम वेदः?इत्यस्मिन् प्रसङ्गे विभिन्नानां पण्डितानां विभिन्नानि लक्षणानि प्राप्यन्ते । तेषु आपस्तम्बेन वेदस्य लक्षणम् एवं प्रदीयते यत् –**'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**इति । लक्षणेऽस्मिन् पदद्वयं


©Indira Gandhi National Open University

प्राप्यते यथा –'मन्त्रः', 'ब्राह्मणम्'चेति । अत्र 'मन्त्र'रिति पदेन संहिताभागो बोध्यते । 'ब्राह्मणम्'इति भागः पुनः त्रिधा विभज्यते –'ब्राह्मणम्', 'आरण्यकम्', 'उपनिषद्'चेति । एवं वेदः चतुर्धा विभज्यते । एषु चतुर्षु विभागेष्वन्तिमभागो वर्तते 'उपनिषदि'ति । अस्याम् उपनिषदि प्रमुखरूपेण वेदस्य ज्ञानकाण्डस्य वर्णनं प्राप्यते । जीवनरहस्य विज्ञानम्, जीवनस्य प्रमुखं प्रयोजनं 'मोक्ष'प्राप्तेः मार्गोऽपि अत्र सुष्ठुतया दृश्यते । जीवनरहस्यविज्ञानतत्त्वेष्वन्यतमं तत्त्वम् 'आत्मतत्त्वम्'इति । आत्मतत्त्वस्य स्वरूपमि उपनिषत्सु सम्यग्तया प्रतिपाद्यते । आत्मनो धर्म-स्वरूपादिषु वर्णने उपनिषदः स्थानमन्यतममिति ।

उपनिषत्सु वर्णितम् 'आत्मतत्त्वम्'

उपनिषत्सु प्रतिपाद्यविषयेषु प्रमुखं भजते 'ब्रह्मविद्या'इति । 'ब्रह्म'एव 'परमात्मा'इत्यप्युच्यते । अस्य ब्रह्मणरेव विकृतिस्वरूपं भवति दृश्यमानं जगदिदम् । तस्य ब्रह्मणरेव सूक्ष्मसत्तास्वरूपं जीवात्मानं धार्य संसारेऽस्मिन् प्राणिनः जीवन्ति । शंकराचार्यस्य अद्वैतभावनायां जीवात्मा परमात्मा चेति एकमेव । तस्मात् प्रोक्तम् - **"ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।"** इति । परन्तु, रामानुजाचार्यस्य द्वैतवादिभावनायां जीवात्मा परमात्मा चेति सत्ता द्वयमेव विशिष्यते ।

वेदेषु सूर्य, जीवात्मा, परमात्मा च ज्योतिर्मयत्त्वरूपेण उपस्थाप्यते । तेषां त्रयाणां कर्माण्यपि पृथक् रूपेणोल्लिख्यते । तेषां कार्याणि तु प्रथमतः सूर्यः कृषिकार्यं साधनं करोति । अर्थात् वपनकार्ये सहायकं भवति । द्वितीयतो जीवात्मा स्वीयशक्त्या एव संसारो दृश्यते । तृतीयतः परमात्मा गतिशीलं तथा क्रियाशीलं भवति । अस्य स्वरूपम् अर्थात् मूर्तरूपं द्रष्टुं न शक्यते । प्राप्यते यथा –

**"त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।**

**विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ।।**[२] इति ।

अस्य अभिप्रायं वर्तते यत् परमात्मा, जीवात्मा चेति ज्योतिर्मयस्वरूपं भवति । परन्तु, परमात्मा, जीवात्मा चेति तु एकमेव । अस्य अयमेव पार्थक्यं यत् जीवात्मा दृश्यमानं भवति, अर्थात् तत् मूर्तरूपं भवति । परन्तु, परमात्मा अदृश्यम् अर्थात् निराकारं भवति । जीवात्मा प्रत्यक्षरूपेण जगदिदं साक्षात्कारं कृत्वा इतस्ततः परिभ्रमणं करोति । परन्तु, परमात्मा


©Indira Gandhi National Open University

प्रत्यक्षरूपेण अस्मिन् जगति न वर्तते । सम्पूर्णं विश्वमिदं तस्य एवं कार्यं वर्तते । स अस्ति सर्वस्य कारणस्वरूपम् ।

वस्तुतः तत्त्वस्य पूर्णरूपं शुद्धावस्था भवति 'आत्मातत्त्वम्' । प्रकृततः तत्तु तत्त्वमेव उच्यते । कारणं तत्तु आत्मापि न तु अनात्मापि । ऋग्वेदे आत्मानं वायुस्वरूपप्राणरूपेण उपस्थाप्यते । ब्राह्मणग्रन्थे आत्मातत्त्वमिति शब्दो जीवात्मावाचकं भवति । आचार्यशंकरेणापि उच्यते यत् आत्मा सर्वत्र व्याप्तं भवति । सर्वस्य सर्वम् आत्मा स्वयमेव गृह्णाति । स विषयाणां उपभोक्ता स्वयमेव । तस्य सत्ता निरन्तरं प्रवहति । अतस्तमात्मा इत्युच्यते । यथोक्तम् -

**"यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह ।**

**यच्चास्य सन्ततो भावस्तस्मादात्मेति कीर्त्यते ।।**[३]" इति ।

उपनिषदनुसारं तु आत्मा नित्यं पदार्थं भवति । मृत्युरनन्तरमपि आत्मा सुरक्षितरूपेण एव स्थीयते ।

स आत्मा कदापि न जायते, म्रियतेऽपि न । पुनश्च आत्मा स्वस्मात् कस्यापि उत्पन्नं न करोति, अपि तु स्वयमपि कस्मात् नोत्पद्यते । स तु अजन्मा, नित्यं, शाश्वतं, सनातनश्च प्रतिभाति । प्राणिनां स्वीयतनुरेव विनश्यति, परन्तु आत्मा कदापि न विनश्यति । तथाहि श्रूयते -

**"न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥**[४] इति ।

आत्मा सर्वेषु जीवेषु विद्यमाना एका सत्ता वर्तते । परन्तु, यद्यपि आत्मा सर्वस्य प्राणिजातस्य अन्तर्वर्ती भवति, तथापि तमात्मानं कोऽपि ज्ञातुं न शक्यते । आत्मा तु सदैव मरणधर्मरहितं गुणविशिष्ट्यम् । आत्मास्ति अणुतमापेक्षयापि अणुतमः । पुनश्च स आत्मा महदपेक्षयापि महत्तमः । प्राणिजातस्य हृदयरूपिगुहायां स निवसति । तस्यात्मनो महिमा केनापि प्राणिना परमेश्वरस्याग्रहेनैव शोकरहितस्तथा कामविवर्जितः सन् ज्ञायते । उक्तश्च –

**"अणोरणीयान्महतो महीयानात्मस्य जन्तोर्निहितो गुहायाम् ।**

**तमक्रतुः पश्यति वीतशोको धातुप्रसादान्महिमानमात्मनः ।।**[५]इति।


©Indira Gandhi National Open University

छान्दोग्योपनिषद्यपि प्रजापतिना इन्द्रं प्रति आत्मनः स्वरूपमुक्त्वा उच्यते आत्मा पापविमुक्तमिति । स जरा-वृद्धावस्थयोः विमुक्तं भवति । बुभुक्षा-पिपासाविवर्जितं सन् सः संतिष्ठति । सत्यकामव्यक्तिनैव स आत्मा अवज्ञायते । उच्यते च - **"य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच** ।।[६]इति ।आत्मा अजन्मा-व्यापक-सर्वातिशयि-नित्य-नियन्ता-सर्वान्तर्यामीत्यादीन् गुणयुक्तान् भवन्ति । आत्मनो प्रसङ्गे श्रीमद्भवगद्गीतायामपि सम्यक् रूपेणोपलभ्यते -

**"वासांसि जीर्णानि यथा विहाय**

**नवानि गृह्णाति नरोऽपराणि ।**

**तथा शरीराणि विहाय जीर्णा-**

**न्यन्यानि संयाति नवानि देही ।।[७]"** इति ।

अत्र उदाहरणं प्रदर्श्य उपस्थाप्यते यत् - येन प्रकारेण मनुष्याः जीर्णानि-शीर्णानि वस्त्रानि विहाय नूतनानि अपराणि वस्त्रानि परिधारयन्ति, तेन प्रकारेणात्मापि जीर्णानि शरीराणि विहाय नवानि देही पुनः प्रविशति । अर्थात्, आत्मनः कदापि मरणं नास्ति । आत्मा तु विनाशं शरीरं त्यक्त्वा नूतनं शरीरं परिगृह्णाति । तमात्मानं शस्त्राणि न छिन्दन्ति, अग्निरपि न दहति, जलमपि न क्लेदयति, वायुरपि न शोषयति । तथाहि श्रूयते -

**"नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।**

**न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥[८]"** इति।

मरणधर्मरहितस्य आत्मनोऽमरत्वं यो न जानाति स परमपदं मुक्तिं न लभति । अर्थात् परमात्मना सह एकीभूतं भवितुं न शक्ष्यति। तस्मात् स सदैव जन्म-मृत्युचक्रेण संसारेऽस्मिन् परिचाल्य कर्मफलादिः संभूज्य संतिष्ठति । आत्मा जीव-जडजगतो भिन्नं वर्तते । स सर्वथा असंसारिकं, निरवयवं, निर्विकारयुक्तञ्च । स तु केवलं चैतन्ययुक्तमेव गुणविशिष्ट्यम् । पुनश्च चैतन्यस्यापि चतुरवस्थाः वर्तन्ते । यथा - जाग्रत-स्वप्न-सुषुप्ति-तुरीयञ्च ।


©Indira Gandhi National Open University

जाग्रतावस्थायां चैतन्यस्य विषयो भौतिकजगतो बाह्यसंसारमिति । अस्यामवस्थायाम् आत्मा स्थूलपदार्थान् अनुभवन्ति । अत्रात्मानं वैश्वानररित्युच्यते । अस्यामवस्थायां बाह्यानन्दमनुभवति ।

द्वितीयावस्था भवति स्वप्नः । अस्यामवस्थायाम् आत्मा आभ्यन्तरजगदर्थात् सूक्ष्मपदार्थान् अनुभवन्ति । अत्र चैतन्यज्ञानस्य विषयमान्तरिकं भवति । अत्र चैतन्यं तेजरुच्यते । अस्यामवस्थायामाभ्यन्तरान्दमनुभवति ।

सुषुप्तिर्भवति आत्मनस्तृतीयावस्था । अस्यामवस्थायां गम्भीरनिद्रायां गच्छति । अत्रात्मा ब्रह्मणा सह एकरूपं सम्भूय आनन्दमनुभवति । इयमवस्था प्राज्ञावस्था इत्युच्यते । एषावस्था द्वैतभावनां सम्पोषयति ।

आत्मनोऽतीव ऊर्धतमावस्था तुरीयावस्थेति । अवस्थेयं विशुद्धचैतन्यस्य अवस्थेति । अस्यामवस्थायां चैतन्यं बाह्य- आभ्यन्तरानन्दादिनां कस्यापि विषयस्य भोगं न करोति । अवस्थेयं चैतन्यमपि कथितुं न शक्यते, अपि त्वचैतन्यमपि न । अस्यामवस्थायाम् आत्मानं परमतत्त्वमित्युच्यते । अयमेव अदृष्टम्, अग्राह्यम्, अलक्षम्, अचिन्त्यम्, अन्यपदेश्यश्चेति । इदमेव परमतत्त्वमित्युच्यते ।

उपसंहारः

संसारेऽस्मिन् सर्वेषु भूतेषु श्रेष्ठतमोऽस्ति मनुष्यः । मनुष्यो हि सुखानि दुःखानि च अनुभवति । संसारे जीवनमात्रमेव सर्वे मनुष्याः दुःखपीडिताः जायन्ते । तस्मात् मनुष्यजीवनस्य प्रमुखं प्रयोजनं वर्तते दुःखनिवृत्तिरिति । दुःखनिवृत्तिर्नाम परमात्मानप्राप्तिरिति । परमात्मनं प्राप्तये आत्मतत्त्वस्य ज्ञानमपरिहार्यम् । अतो मनुष्यजीवनस्य परमलक्षं प्राप्त्यर्थ्यम् आत्मतत्त्वं जानीयात् ।आत्मतत्त्वस्य विज्ञानेन जनाः जीवात्मा-परमात्मनोः स्वरूपं विज्ञाय अनयो एकत्वं प्रतिपादने समर्थाः भवितुं शक्नुवन्ति । पुनश्च जीवनस्य प्रमुखं लक्ष्यं मोक्षमार्गं ज्ञातुं प्रभवन्ति ।

सन्दर्भाः


१. म. स्मृ. ०२/०६
२. ऋ. वे.०१/१६४/४४
३. क. उ. शांकरभाष्यम् ०२/०१/०१
४. क. उ. ०१/०२/१८
५. क. उ. ०१/०२/२०
६. छा. उ. ०८/०७/०१



©Indira Gandhi National Open University

७. गी. ०२/२२
८. गी. ०२/२३

सन्दर्भग्रन्थसूची


- सम्पा. शर्मा, नारायण. शर्मा, चिन्तामणि. ऋग्वेदसंहिता. आदर्श-संस्कृत-शोध-संस्था (वैदिक-संशोधन-मण्डलम्), पुणे, २०१४
- ईशादिदशोपनिषदः. मोतीलाल बनारसीदास, दिल्ली, २०१५
- मिश्र, जगदीशचन्द्र. भारतीय दर्शन. चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१९
- मिश्र, जगदीशचन्द्र. वैदिकवाङ्मयस्येतिहासः. चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१८
- द्विवेदी, कपिलदेव. वैदिक साहित्य एवं संस्कृति. विश्वविद्यालय प्रकाशन वाराणसी, २०१८



©Indira Gandhi National Open University